# अष्टम: पाठ: । मनस: स्वच्छता ।

‘श्यामची आई’ इति पाण्डुरङ्ग सदाशिव साने (साने गुरुजी) महोदयेन मराठीभाषया विरचितं पुस्तकम्। अस्मिन् पुस्तके तस्य आत्मकथनपरा: कथा: सन्ति। एता: स्मरणकथा: बालकानां कृते बोधपरा: संस्कारक्षमा: मातृस्नेहवर्धका: च। श्याम: प्रतिरात्रं स्वमित्रेभ्य: स्वजीवनाधारिता: स्मृतिकथा: कथयति। संस्कृतानुवादद्वारा अस्य आदर्शभूतस्य पुस्तकस्य परिचय: कारित: **डॉ. मञ्जूषा कुलकर्णी** महाभागया। तस्मात् पुस्तकात् अयं प्रसङ्ग:।




‘‘बाल्यादेव द्विवारं स्नानं करोमि स्म अहम् ।’’ श्यामेन कथा आरब्धा। ‘‘द्विवारं स्नानस्य अभ्यास: उत्तम: एव। रात्रौ निद्राया: पूर्वं स्नानं कुर्म: चेत् शरीरं स्वच्छं, सतेज:, लघुभारमिव च भासते। निद्राया: पूर्वं वयं प्रार्थनां कुर्म:, एतत् भवति मनस: स्नानम्। यदि शरीरं मन: च स्वच्छे तर्हि निद्रा उत्तमा भवति।



एकदा प्रतिदिनमिव खेलित्वा अहं गृहम् आगत्य स्नानार्थं गतवान्। सायङ्कालस्य स्नानार्थम् अधिकस्य जलस्य आवश्यकता न भवति। स्नानं समाप्य मया उक्तम्, ‘‘अम्ब, शुष्कय मे अङ्गम्। जलं समाप्तं, सत्वरं शुष्कय मे अङ्गम्’’ इति उच्चै: अवदम् अहम्। सायङ्काले मे माता स्वशाटिकया एव मम शरीरं मार्जयति स्म।

माता आगता, मम अङ्गं मार्जितवती आज्ञां च दत्तवती ‘‘देवपूजार्थं पुष्पाणि आनय, श्याम’’ इति। ‘‘मम पादतलौ आर्द्रौ स्त:। मृत्तिकया मलिनौ भविष्यत:। अत: मम पादतलौ अपि स्वच्छीकुरु।’’ इति मया कथितम्। ‘‘पादतलौ आर्द्रौ स्त: तर्हि किं जातं रे श्याम ? अधुना केन वस्त्रेण मार्जयामि ?’’ ‘‘अम्ब, तव शाटिकाञ्चलं पाषाणे विस्तारय ।’’ ‘‘श्याम, अतीव हठस्वभाव: असि।’’ इति उक्त्वा मात्रा शाटिकाञ्चलं विस्तारितम्। अहं चरणौ तदुपरि स्थापयित्वा शुष्कौ कारयित्वा निर्गतवान्। मातु: वस्त्रम् आर्द्रम् अभवत्।

तस्मिन् समये तया शाटिकापरिवर्तनं कर्तुं न शक्यते इत्यपि मया न चिन्तितम्। परन्तु पुत्रचरणौ मलिनौ न भवेताम्, पुत्रेच्छा पूर्णा भवेत् एतदर्थं तया स्वशाटिका आर्द्रा कृता। माता पुत्रार्थं किं किं न करोति, किं किं न सहते, किं किं न समर्पयति? अहं गृहस्य अन्तर्भागं गतवान्, पूजार्थं पुष्पाणि स्थापितवान्। माता दीपं गृहीत्वा आगतवती उक्तवती च, ‘‘श्याम, चरणौ मलिनौ न भवत: अत: यथा प्रयतसे तथैव मन: मलिनं न भवतु एतदर्थम् अपि प्रयतस्व। प्रार्थयस्व देवं शुद्धबुद्ध्यर्थम्।’’

भो मित्राणि, कियन्त: मधुरा: शब्दा:! पावित्र्यार्थं स्वच्छतायै वयं प्रतिदिनं प्रयतामहे। वस्त्रस्वच्छतार्थं क्षालनचूर्णम् अस्ति, शरीरार्थं चन्दनफेनकानि सन्ति। शरीरं वस्त्राणि च मलिनानि न भवन्तु अत: सर्वे प्रयत्नं कुर्वन्ति। अपि वयं मनस: स्वच्छतायै प्रयतामहे ?’’

## भाषाभ्यासः



**१. एकवाक्येन उत्तरत।**

१) निद्रा कदा उत्तमा भवति? २) स्नानेन किं भवति? ३) कदा प्रार्थनां वदामः?
४) माता श्यामस्य चरणौ केन मार्जयति? ५) वयं प्रतिदिनं किमर्थं प्रयतामहे ?

**२. माध्यमभाषया लिखत।** मनसः स्वच्छताविषये माता श्यामं किं बोधितवती?

**३. अ) सन्धिविग्रहं कुरुत ।** १. लघुभारमिव २. इत्यपि ३. इतोऽपि ४. तथैव ५. कदापि

**आ) वर्णविग्रहं कुरुत।** १. पादतलौ २. स्नानस्य

**इ) विशेषण-विशेष्य-सम्बन्धः।**

| विशेष्यम् | पादतलौ | अभ्यासः | मनः | शरीरम् |
|---|---|---|---|---|
| विशेषणम् | सतेजः | मलिनम् | आर्द्रौ | उत्तमः |

**४. समानार्थकशब्दयुग्मं चिनुत।** शरीरम्, मृत्तिका, चरणौ, मित्रम्, मनः, मृद्, सुहृद्, चित्तम्, पादौ, देहः

**५. विरुद्धार्थकं शब्दं लिखत।** पवित्रम्, शुष्कम्, नीचैः, स्वच्छम्, अधिकम्, सत्वरम्।

CG9QTT

**६. उपपदविभक्तिं योजयत।**

१. -------पूर्वं वयं प्रार्थनां वदामः। (निद्रायाः/निद्रायै)
२. एकदा नित्यमिव खेलित्वा अहं ------ आगतः। (गृहे/गृहम्)

**७. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १. मात्रा स्वशाटिका आर्द्रा कृता यतः .....।

अ) सा वर्षायां क्लिन्ना । आ) तेन पुत्रेच्छा पूर्णा भवेत् ।

| ॥ अमरकोषः ॥ | विग्रहः। |
|---|---|
| कुक्कुरः - कौलेयकः सारमेयः कुक्कुरो मृगदंशकः। | कौलेयकः, सारमेयः, कुक्कुरः, मृगदंशकः। |
| कृपणः - कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः। | कदर्यः, कृपणः, क्षुद्रः, किंपचानः, मितंपचः। |
| शोभनम् - सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्। | सुन्दरम्, रुचिरम्, चारु, सुषमम्, साधु, शोभनम्। |
| मलिनम् - मलीमसं तु मलिनं कच्चरं मलदूषितम्। | मलीमसम्, मलिनम्, कच्चरम्, मलदूषितम्। |
| प्रभूतम् - प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु। | प्रभूतम्, प्रचुरम्, प्राज्यम्, अदभ्रम्, बहुलम्, बहु। |
| पूर्णम् - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। | समग्रम्, सकलम्, पूर्णम्, अखण्डम्, अनूनकम्। |
| पुत्रः - आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। | आत्मजः, तनयः, सूनुः, सुतः, पुत्रः। |
| राक्षसः-राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः। | राक्षसः, कौणपः, क्रव्यात्, क्रव्यादः, अस्रपः, आशरः। |
| शङ्करः - शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः। | शम्भुः, ईशः, पशुपतिः, शिवः, शूली, महेश्वरः। |
| मेघः - अभ्रं मेघो वारिवाहस्तडित्वान् वारिदोऽम्बुभृत्। | अभ्रम्, मेघः, वारिवाहः, तडित्वान्, वारिदः, अम्बुभृत्। |
| नभः - नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्। | नभः, अन्तरिक्षम्, गगनम्, अनन्तम्, सुरवर्त्म, खम्। |
| महिला - प्रतीपदर्शिनी वामा वनिता महिला तथा। | प्रतीपदर्शिनी, वामा, वनिता, महिला। |
| जगत् - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। | जगती, लोकः, विष्टपम्, भुवनम्, जगत्। |
| वर्ष - संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः। | संवत्सरः, वत्सरः, अब्दः, हायनः, शरद्, समाः। |
| शुभम् - श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्। | श्वःश्रेयसम्, शिवम्, भद्रम्, कल्याणम्, मङ्गलम्, शुभम्। |